यथा राजपुरुषादिकस्तत्पुरुषो नीलोत्पलादिकः कर्मधारयो द्विगाव्यादिरव्ययीभावश्च । कश्चित् सर्वपदार्थधर्मिकबुद्धिहेतुत्वात् सर्वपदप्रधानः यथेतरेतरद्वन्द्वो द्वन्द्वमात्रं वा । कश्चित् स्वघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानः यथा बहुव्रीहिः खलेयवाद्यव्ययीभावश्च । तदेवं पञ्च भेदानादायैव पञ्चविधत्वं प्राच्यैरुक्तमतो न विरोधः । नित्यानित्यभेदेन समासस्य द्वैविध्यमप्यस्ति यदुक्तं जयादित्येन "विभक्तिमात्रप्रक्षेपाद्विजान्तर्गतनामसु । स्वार्थस्याबोधबोधाभ्यां नित्यानित्यौ समासकाविति ।" स्वान्तर्गतनामसु विभक्तिमात्रप्रक्षेपेण यल्लभ्यार्थस्याबोधः स नित्यः समासः यथा कृष्णसर्पनिर्मक्षिकासुरादिः कृष्णः सर्पो मक्षिकाया निः न सुर इत्यादितस्तल्लभ्यस्य वैजात्यादेरग्रहात् । यल्लभ्यस्य च बोधः सोऽनित्यो यथा राजपुरुषपूर्वकायादिः तल्लभ्यार्थस्य राज्ञः पुरुषः पूर्वं कायस्येत्यादिवाक्यादपि प्रतीतेः । स्फुरद्बाणो चलन्नेत्र इत्यादिकः कर्मधारयोऽप्यनित्य एव समासः स्फुरन्तो बाणेत्यादिविग्रहस्य बाणादौ स्फुरदादिविधेयकबोधाजनकत्वेऽपि स्फुरदभिन्नबाणादावेकत्वादिबोधकत्वमादायैव तदर्थप्रकाशकत्वात् स्फुरन्तीं बाणमित्यादिवाक्यस्यैव तत्र विग्रहत्वसम्भवाच्च । विग्रह एव समासलभ्यार्थस्य बोधकत्वं तन्त्रं न तु समासे विग्रहार्थस्य । विग्रहलभ्ययोर्लिङ्गसङ्ख्ययोर्व्यञ्जकवैधर्म्यं च प्रायशः समासाबोध्यत्वात् । अतएव यत्र समासे तयोर्व्यञ्जकसद्भावस्तत्रावगमोऽपि यथा जरतीचित्रगुर्जनः प्रियतिसा पुरुष इत्यादौ स्त्रीत्वस्य स्त्रीप्रत्ययतिसादेशयोस्तदभिव्यञ्जकयोः सत्त्वात् तथा अक्षपरि प्रिययुवा इत्यश्वमित्यादावेकत्वादेः अक्षशलाकयोरेकत्व एवाव्ययीभावस्य युष्मदस्मदोर्द्वित्व एव युवावाद्यादेशस्य सेनाङ्गानां बहुत्व एव समाहारद्वन्द्वस्य विधानात् । तदुक्तमभियुक्तैः "सङ्ख्या तु व्यञ्जकाभावादव्यक्ता प्रातरादिवत् । यत्र तु व्यञ्जकं किञ्चित्तत्र सङ्ख्या प्रकाशते । शलाकापरि इत्यश्वं पूर्वकायोऽर्द्धपिप्पलीति" । पूर्वादेरर्द्धस्य च इत्यैकत्वमन्तर्भाव्यैवावयविना तत्पुरुषस्य व्युत्पन्नत्वात् सरसिजादौ कण्ठेकालादौ चालुक् समासे सुपः सङ्ख्यावगमेऽपि न क्षतिः तत्र व्यञ्जकसुपः सत्त्वेऽपि सङ्ख्या न बुध्यते इति समासशक्तिवादिनः प्रातञ्जलाः"। अधिकं तत्र दृश्यम्

**समासक्त** त्रि० सम्+आ+सन्ज-क्त । १संयुक्ते २अत्यन्तासक्ते ३अभिनिविष्टे च ।

**समासङ्ग** पु० सम्+आ+सन्ज-घञ् । १संयोगे २सम्यगभिनिवेशे च ।

**समासवत्** पु० समास+अस्त्यर्थे मतुप् मस्य वः । १व्याकरणोक्तसमासयुक्ते शब्दे २संक्षेपयुक्ते त्रि० ३तन्द्रष्टरि पु० शब्दच० । समासेन तुल्यं वति । ४समासतुल्यक्रियायां अव्य० । [२निकटस्थिते ३प्राप्ते त्रि० ।

**समासादित** त्रि० सम्+आ+सद+णिच-क्त । १सम्यगाहृते

**समासान्त** पु० ६त० । व्याकरणोक्तसमासस्य शेषावयवे तत्प्रत्योत्तरविहितविधिश्च अनित्यः "समासान्तविधिरनित्यः" परिभा० ।

**समासार्था** स्त्री समासेन संक्षेपेणार्थोऽभिहितोयस्याः । १समस्यायाम् अमरः । ६त० । २समासबोध्यार्थे पु० ।

**समाहार** पु० सम्+आ+हृ-घञ् । १समुच्चये अमरः २अनुङ्गूनावयवभेदे समूहे समाहारे द्वन्द्वे तु द्वित्वबहुत्वादिनैव समूहस्य बोधात् समूहत्वमेव प्रवृत्तिनिमित्तम् । द्वन्द्वशब्दे ३७९२ पृ० द्विगुशब्दे च ३८१२ पृ० दृश्यम् ।

**समाहारद्वन्द्व** पु० व्या० उक्ते समासभेदे ३७९२पृ० दृश्यम् ।

**समाहारद्विगु** पु० व्या० उक्ते समासभेदे द्विगुशब्दे ३८१२पृ० दृश्यम् ।

**समाहित** त्रि० सम्+आ+धा-क्त । १कृतसमाधौ २आहिते ३प्रतिज्ञाते मेदि० ४निष्पन्ने धरणिः ५शुद्धे शब्दच० । ६कृतसमाधाने । भावे क्त । ६समाधाने न० ।

**समाहृत** त्रि० सम्+आ+हृ-क्त । १संगृहीते २एकत्रस्थीकृते ।

**समाहृति** स्त्री सम्+आ+हृ-क्तिन् । १संक्षेपे २संग्रहे अमरः । ३समुच्चये च ।

**समाह्वय** पु० समाह्वयते सम्+आ+ह्वे-अच् आत्वाभावः । १आह्वाने २प्राणिकरणकद्यूते च "प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः" इति मनुः । ३तदाधिकारेण प्रवृत्तविवादभेदे च द्यूतशब्दे ३७७४पृ०दृश्यम् ।

**समाह्वा** स्त्री समा-आह्वा यस्याः । १गोजिह्वाख्ये शब्दच० प्रा०स० । २समाख्यायाञ्च । [शब्दर० ।

**समिक** न० सम्-इण-डि संज्ञायां कन् । शेलास्त्रे (बर्छा)

**समित्** स्त्री समीयतेऽत्र सम्+इण्-आधारे क्विप् । युद्धे अमरः

**समिता** स्त्री सम्+इण्-क्त । १गोधूमचूर्णभेदे "गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः । प्रक्षिप्तास्ता विनिष्पिष्टाश्चालिताः समिताः स्मृताः" राजनि० । २सङ्गते त्रि० ।

**समिति** स्त्री सम्+इण-आधारे क्तिन् । १सभायाम् अमरः